# Maddhyandinanamoshadhyanuvakah

# माद्ध्यन्दिनानामोषध्यनुवाकः

## Document Information

Text title : Oshadhi Sukta mAddhyandinAnAm

File name : mAddhyandinAnAmoShadhyanuvAkaH.itx

Category : veda, svara, sUkta

Location : doc_veda

Transliterated by : Mandar Kulkarni

Proofread by : Mandar Kulkarni

Latest update : March 3, 2025

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

June 1, 2025

*sanskritdocuments.org*

# माद्ध्यन्दिनानामोषध्यनुवाकः

माद्ध्यन्दिनसंहितायां द्वादशेऽद्ध्याये षष्ठोऽनुवाकः ।
आ पञ्चसप्तताया ऋच आ एकोत्तरशततमाम् (७५-१०१) सप्तविंशत्यृचोऽनुवाकः ।
काण्वसंहिताया नातिभिन्नमपि माद्ध्यन्दिनानामुच्चारणवैविध्यदर्शनाय
पृथक् प्रदर्श्यते -
हरिः ओ३म् ॥

## सस्वरः

या ओषधीः पूर्व्वा जाता देवेब्भ्यस्त्रियुगं पुरा ।
मनै नु बब्भ्रुणामहꣳ शतं धामान सप्तच ॥ १॥

शतं वो अम्ब धामानि सहस्रमुत वो रुहः ।
अधा शतक्रत्त्वो यूयमिमं मे अगदं कृत ॥ २॥

ओषधीः प्रति मोदद्ध्वं पुष्पवतीः प्रसूवरीः ।
अश्श्वा इव सजित्त्वरीर्व्वीरुधः पारयिष्णवः ॥ ३॥

ओषधीरिति मातरस्तद्वो देवीरुप ब्ब्रुवे ।
सनेयमश्श्वं गां व्वास आत्मानं तव पूरुष ॥ ४॥

अश्श्वत्थे वो निषदनं पर्ण्णे वो वसतिष्कृता ।
गोभाज इत्किलासथ यत्सनवथ पूरुषम् ॥ ५॥

यत्रौषधीः समग्ग्मत राजानः समिताविव ।
व्विप्रः स उच्च्यते भिषग्ग्रक्षोहामीवचातनः ॥ ६॥

अश्श्वावतीꣳ सोमावतीमूर्ज्जयन्तीमुदोजसम् ।
आऽवित्सि सर्व्वा ओषधीरस्मा अरिष्टतातये ॥ ७॥

उच्छुष्म्मा ओषधीनां गावो गोष्ठादिवेरते ।
धनꣳ सनिष्ष्यन्तीनामात्मानं तव पूरुष ॥ ८॥

इष्कृतिर्न्नाम वो माताऽथो यूयꣳ स्थ निष्कृतीः ।
सीराः पतत्रिणी स्त्थन यदामयति निष्कृथ ॥ ९॥

अति विश्वाः परिष्ठा स्तेन इव व्रजमक्क्रमुः ।
ओषधीः प्राचुच्यवुर्य्यत्किञ्च तन्वो रपः ॥ १०॥

यदिमा व्वाजयन्नहमोषधीर्हस्त आदधे ।
आत्मा यक्ष्मस्य नश्यति पुरा जीवगृभो यथा ॥ ११॥

यस्यौषधीः प्रसर्प्पथाङ्गमङ्गं परुष्ष्परुः ।
ततो यक्ष्मं व्विबाधध्व उग्ग्रो मद्ध्यमशीरिव ॥ १२॥

साकँ य्यक्ष्म प्रपत चाषेण किकिदीविना ।
साकं व्वातस्य ध्राज्या साकन्नश्श्य निहाकया ॥ १३॥

अन्या वो अन्न्यामवत्त्वन्न्यान्न्यस्या उपावत ।
ताः सर्वाः संविदाना इदम्मे प्रावता व्वचः ॥ १४॥

याः फलिनीर्य्या अफला अपुष्प्पा याश्च पुष्पिणीः ।
बृहस्प्पतिप्रसूत्तास्ता नो मुञ्चन्त्वꣳहसः ॥ १५॥

मुञ्चन्तु मा शपत्थ्यादथो व्वरुण्यादुत ।
अथो यमस्य पड्वीशात्त्सर्व्वस्माद्देवकिल्बिषात् ॥ १६॥

अवपतन्तीरवदन् दिव ओषधयस्प्परि ।
य जीवमश्नवामहै न स रिष्ष्याति पूरुषः ॥ १७॥

या ओषधीः सोमराज्ञीर्ब्बह्वीः शतविचक्षणाः ।
तासामसि त्त्वमुत्तमारं कामाय शꣳ हृदे ॥ १८॥

या ओषधीः सोमराज्ञीर्व्विष्ठिताः पृथिवीमनु ।
बृहस्प्पतिप्प्रसूता अस्यै सन्दत्त व्वीर्यम् ॥ १९॥

याश्चेदमुपशृण्ण्वन्ति याश्च दूरं परागताः ।
सर्व्वाः सङ्गत्त्य व्वीरुधोस्यै सन्दत्त व्वीर्य्यम् ॥ २०॥

मा वो॑ रिषत्त्खनि॒ता यस्म्मै॑ चा॒हं खना॑मि वः ।
द्वि॒पाच्चतु॑ष्प्पाद॒स्माक॒ꣳ सर्व्व॑मस्त्वनातु॒रम् ॥ २१॥

ओष॑धय॒ः सम॑वदन्त॒ सोमे॑न स॒ह राज्ञा ।
यस्म्मै॑ कृ॒णोति॑ ब्ब्राह्ह्म॒णस्तꣳ रा॑ज॒न्न्पारयामसि ॥ २२॥

ना॒श॒यि॒त्री ब॒लास॒स्यार्श॑स उप॒चिता॑मसि ।
अथो॑ श॒तस्य॒ यक्ष्मा॑णां पाका॒रोर॑सि॒ नाश॑नी ॥ २३॥

त्वां ग॑न्ध॒र्व्वा अ॑खन॒ँस्त्वामिन्द्र॒स्त्वां बृह॒स्प्पति॑ः ।
त्वामो॑षधे॒ सोमो॒ राजा॑ व्वि॒द्द्वान्न्यक्ष्मा॑दमुच्च्यत ॥ २४॥

सह॑स्व मे॒ अरा॑तीः॒ सह॑स्व पृतनाय॒तः ।
सह॑स्व॒ सर्व्वं॑ पा॒प्मान॒ꣳ सह॑मानास्योषधे ॥ २५॥

दीर्ग्घा॒यु॑स्त ओषधे खनि॒ता यस्म्मै॑ च त्त्वा॒ खना॑म्म्य॒हम् ।
अथो॒ त्त्वं दीर्ग्घा॒यु॑र्ब्भूत्त्वा श॒तव॑ल्शा॒ व्विरो॑हतात् ॥ २६॥

त्वमु॑त्त॒मास्यो॑षधे॒ तव॑ व्वृ॒क्षा उप॑स्त्तयः ।
उप॑स्तिरस्त्तु॒ सो॒स्माक॒ँ य्यो अ॒स्माँ अ॑भि॒दास॑ति ॥ २७॥

## निःस्वरः

या ओषधीः पूर्व्वा जाता देवेब्भ्यस्त्रियुगं पुरा ।
मनै नु बब्भ्रुणामह शतं धामान सप्तच ॥ १॥

शतं वो अम्ब धामानि सहस्त्रमुत वो रुहः ।
अधा शतक्रत्त्वो यूयमिमं मे अगदं कृत ॥ २॥

ओषधीः प्रति मोदद्ध्वं पुष्पवतीः प्रसूवरीः ।
अश्श्वा इव सजित्त्वरीर्व्वीरुधः पारयिष्णवः ॥ ३॥

ओषधीरिति मातरस्तद्द्वो देवीरुप ब्ब्रुवे ।
सनेयमश्श्वं गां व्वास आत्मानं तव पूरुष ॥ ४॥

अश्श्वत्थे वो निषदनं पर्ण्णे वो वसतिष्कृता ।
गोभाज इत्किलासथ यत्सनवथ पूरुषम् ॥ ५॥

यत्रौषधीः समग्ग्मत राजानः समिताविव ।
व्विप्रः स उच्यते भिषग्ग्रक्षोहामीवचातनः ॥ ६॥

अश्श्वावतीं सोमावतीमूर्ज्जयन्तीमुदोजसम् ।
आऽवित्सि सर्व्वा ओषधीरस्म्मा अरिष्टतातये ॥ ७॥

उच्छुष्म्मा ओषधीनां गावो गोष्ठादिवेरते ।
धनं सनिष्ष्यन्तीनामात्मानं तव पूरुष ॥ ८॥

इष्कृतिर्न्नाम वो माताऽथो यूयं स्थ निष्कृतीः ।
सीराः पतत्रिणी स्त्थन यदामयति निष्कृथ ॥ ९॥

अति विश्श्वाः परिष्ठा स्तेन इव व्व्रजमक्क्रमुः ।
ओषधीः प्प्राचुच्च्यवुर्य्यत्किञ्च तन्न्वो रपः ॥ १०॥

यदिमा व्वाजयन्नहमोषधीर्हस्त आदधे ।
आत्मा यक्ष्मस्य नश्श्यति पुरा जीवगृभो यथा ॥ ११॥

यस्यौषधीः प्प्रसर्प्पथाङ्गमङ्गं परुष्प्परुः ।
ततो यक्ष्मं व्विबादध्व उग्ग्रो मद्ध्यमशीरिव ॥ १२॥

साकँ य्यक्ष्म प्प्रपत चाषेण किकिदीविना ।
साकं व्वातस्य ध्ध्राज्ज्या साकन्नश्श्य निहाकया ॥ १३॥

अन्न्या वो अन्न्यामवत्त्वन्न्यान्न्यस्या उपावत ।
ताः सर्व्वाः संविदाना इदम्मे प्प्रावता व्वचः ॥ १४॥

याः फलिनीर्य्या अफला अपुष्प्पा याश्श्च पुष्प्पिणीः ।
बृहस्प्पतिप्रसूत्तास्ता नो मुञ्चन्त्वं हसः ॥ १५॥

मुञ्चन्तु मा शपत्थ्यादथो व्वरुण्यादुत ।
अथो यमस्य पड्बीशात्त्सर्व्वस्माद्देवकिल्बिषात् ॥ १६॥

अवपतन्तीरवदन् दिव ओषधयस्प्परि ।
य जीवमश्श्नवामहै न स रिष्ष्याति पूरुषः ॥ १७॥

या ओषधीः सोमराज्ञीर्ब्बह्वीः शतविचक्षणाः ।
तासामसि त्त्वमुत्तमारं कामाय शं हृदे ॥ १८॥

या ओषधीः सोमराज्ञीर्व्विष्ठिताः पृथिवीमनु ।

बृहस्प्पतिप्प्रसूता अस्यै सन्दत्त व्वीर्यम् ॥ १९॥

याश्श्चेदमुपशृण्ण्वन्ति याश्श्च दूरं परागताः ।
सर्व्वाः सङ्गत्त्य व्वीरुधोस्यै सन्दत्त व्वीर्य्यम् ॥ २०॥

मा वो रिषत्त्खनिता यस्म्मै चाहं खनामि वः ।
द्विपाच्चतुष्प्पादस्माकं सर्व्वमस्त्वनातुरम् ॥ २१॥

ओषधयः समवदन्त सोमेन सह राज्ञा ।
यस्म्मै कृणोति ब्ब्राह्म्मणस्तं राजन्न्पारयामसि ॥ २२॥

नाशयित्री बलासस्यार्शस उपचितामसि ।
अथो शतस्य यक्ष्माणां पाकारोरसि नाशनी ॥ २३॥

त्वां गन्धर्व्वा अखनँस्त्वामिन्द्रस्त्वां बृहस्प्पतिः ।
त्वामोषधे सोमो राजा व्विद्वान्न्यक्ष्मादमुच्च्यत ॥ २४॥

सहस्व मे अरातीः सहस्व पृतनायतः ।
सहस्व सर्व्वं पाप्मानं सहमानास्योषधे ॥ २५॥

दीर्ग्घायुस्त ओषधे खनिता यस्म्मै च त्त्वा खनाम्म्यहम् ।
अथो त्त्वं दीर्ग्घायुर्ब्भूत्त्वा शतवल्शा व्विरोहतात् ॥ २६॥

त्वमुत्तमास्योषधे तव व्वृक्षा उपस्तयः ।
उपस्तिरस्तु सोस्माकँ य्यो अस्माँ अभिदासति ॥ २७॥

Encoded and proofread by Mandar Kulkarni

*Maddhyandinanamoshadhyanuvakah*

pdf was typeset on June 1, 2025

Please send corrections to *sanskrit@cheerful.com*